Roll No. ......................

# 523

## कक्षा 9 वीं परीक्षा, 2019–20

## [7205-C]

# SANSKRIT (General)

## संस्कृत सामान्यम्

[Total No. of Questions: 18]

[Total No. of Printed Pages: 08]

[Time: 03 Hours]

[Maximum Marks: 100]

***निर्देश –***

***(1) सर्वे प्रश्नाः अनिवार्याः सन्ति।***

***(2) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।***

प्र.1 उचित–विकल्पं चित्वा लिखत – (5X1=5)

(क) 'उपैति' इत्यत्र कः सन्धिः?

(अ) गुणसन्धिः (ब) वृद्धि सन्धिः।

(स) दीर्घ सन्धिः (द) अयादि सन्धिः।

(ख) 'शिव+एहि' इत्यस्य सन्धि पदं भवति –

(अ) शिवहि (ब) शिवएहि

(स) शिवेहि (द) शिवौहि

(ग) 'हिमालयः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) पूर्वरूप सन्धिः (ब) परसवर्ण सन्धिः

(स) वृद्धि सन्धिः (द) दीर्घ सन्धिः

(घ) 'रामश्शेते' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) गुणसन्धिः (ब) व्यञ्जन सन्धिः

(स) दीर्घ सन्धिः (द) स्वरसन्धिः

(ङ) अधोलिखितेषु अव्ययम् अस्ति –

(अ) विधा (ब) यदा

(स) प्रभा (द) कतिधा



https://www.evidyarthi.in/

प्र.2 उचित–विकल्प चित्वा लिखत – (5X1=5)

(क) समासा: कतिधा: –

(अ) पञ्चधा: (ब) षड्धा:

(स) द्विधा (द) सप्तधा

(ख) उत्तरपदार्थप्रधान:..........अस्ति।

(अ) अव्ययीभाव: (ब) तत्पुरुष:

(स) द्वन्द्व: (द) बहुव्रीहि:

(ग) 'अनुरूपम्' इत्यस्मिन् पदे समास: अस्ति –

(अ) अव्ययीभाव: (ब) तत्पुरुष:

(स) कर्मधारय: (द) द्विगु:

(घ) 'प्राचार्य:' इत्यस्मिन् पदे उपसर्ग: अस्ति –

(अ) प्राच् (ब) प्र

(स) प्रा (द) प्रच्

(ङ) अधोलिखितेषु उपसर्ग: नास्ति –

(अ) परा (ब) अप्

(स) सम् (द) राम:

प्र.3 उचित–विकल्पं चित्वा लिखत – (5X1=5)

(क) 'अपठत्' इत्यस्मिन् पदे लकार: अस्ति –

(अ) लट् (ब) लृट्

(स) लङ् (द) लोट्

(ख) 'नयति' इत्यत्र धातु: अस्ति –

(अ) नय् (ब) न

(स) नी (द) नम्

(ग) 'मोदन्ताम्' इत्यत्र धातु: अस्ति –

(अ) मोद् (ब) मुद्

(स) मद् (द) मा

(घ) 'पठति' इत्यस्मिन् पदे पुरुष: अस्ति –

(अ) प्रथमपुरुष: (ब) मध्यमपुरुष:

(स) उत्तमपुरुष: (द) नास्ति पुरुष:

(ङ) 'आद्याश्री नित्यम् एव पठति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) आद्याश्री (ब) नित्यम्

(स) एव (द) पठति



https://www.evidyarthi.in/

प्र.4 उचित-विकल्पं चित्वा लिखत – (5×1=5)

(क) सुबन्त शब्देषु कस्य प्रत्ययस्य प्रयोगः भवति –

(अ) सुप् प्रत्ययस्य (ब) तिङ् प्रत्ययस्य

(स) स्त्री प्रत्ययस्य (द) अव्ययस्य

(ख) 'पठितः' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) क्त (ब) क्त्वा

(स) ल्यप् (द) तुमुन्

(ग) 'बुद्धिमान्' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) मतुप् (ब) इनि

(स) तरप् (द) तमप्

(घ) 'बालिका' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) टाप् (ब) ङीप्

(स) ङीष् (द) ङीन्

(ङ) सत्यश्रमाभ्यां..............सिद्धिः।

(अ) विफलार्थ (ब) सकलार्थ

(स) कामार्थ (द) धर्मार्थ

प्र.5 प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिः करणीया – (5×1=5)

(रामायण, बालमृगेन्द्रकम्, सर्पद्वयं, पितृभक्तः, जयसिंहेन)

(क) भारत..........................................................कवयित्री।

(ख) लघु..........................................................प्रतीक रूपेण उत्कीर्णितम्।

(ग) कुण्डलस्य पुत्रः सुकर्मा महान्..........................................................।

(घ) राज्ञा..........................................................वेधशाला निर्माणं कारितम्।

(ङ) वत्स! मुञ्च..........................................................।



https://www.evidyarthi.in/

प्र.6 अधोलिखितेषु प्रश्नेषु त्रयाणा प्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषायां लिखत – (3×2=6)

(क) घटः कैः सम्पूरितः?

(ख) माता इव का रक्षति?

(ग) मदनविनोदः कस्य शिक्षां न श्रृणोति स्म?

(घ) युक्तेन प्राणायामेन किं भवति?

(ङ) श्रीरामः वालिनः राज्ये कं प्रत्यपादयत्?

प्र.7 (अ) अधोलिखितेषु शब्देषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (2)

(क) 'राम' शब्दस्य – चतुर्थी विभक्तिः।

(ख) 'गुरु' शब्दस्य – तृतीया विभक्तिः।

(ग) 'रमा' शब्दस्य – पञ्चमी विभक्तिः।

(घ) 'अस्मद्' शब्दस्य – प्रथमा विभक्तिः।

(ब) अधोलिखितेषु शब्देषु द्वयोः रूपाणि निर्देशानुसारं लिखत – (2)

(क) 'यत्' शब्दः पुल्लिङ्गे – प्रथमा विभक्तिः।

(ख) 'तत्' शब्दः पुल्लिङ्गे – षष्ठी विभक्तिः।

(ग) 'युष्मद्' शब्दः – तृतीया विभक्तिः।

(घ) 'किम्' शब्दः स्त्रीलिङ्गे – द्वितीया विभक्तिः।

प्र.8 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानां उत्तराणि संस्कृतभाषायां लिखत – (5×2=10)

(अ) कदाचिद्रात्रौ सुप्तश्चिन्तयामास – यत् अयं घटः सक्तुभिः परिपूर्णः वर्तते। तद्यदि दुर्भिक्षं भवति, तदनेन रूप्यकाणां शतमुत्पत्स्यते। ततस्तेन मया अजाद्वयं ग्रहीतव्यम्। ततः षाण्मासिकात् आप्रसववशात् ताभ्यां यूथं भविष्यति। ततोऽजाभिः प्रभूता गाः गृहीष्यामि। गोभिर्महिषीः। महिषीभिः वडवाः। वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति। तेषां विक्रयात् प्रभूतं सुवर्णं भविष्यति। सुवर्णेन चतुः शालं गृहं सम्पत्स्यते।

(क) कः सक्तुभिः परिपूर्णः वर्तते?

(ख) दुर्भिक्षे जाते सति सक्तुभिः कतिः रुप्यकाणि उत्पत्स्यते?

(ग) अजाभिः काः गृहीष्यति?

(घ) सुवर्णेन किं भविष्यति?

(ङ) 'गोभिर्महिषी' इत्यस्मिन् पदे सन्धिः का?



https://www.evidyarthi.in/

(ब) उज्जयिनी भारतस्य अत्यन्तं प्राचीनम् ऐतिहासिकं केन्द्रमासीत् धर्म–दर्शन–कला–साहित्य–योग–ज्योतिषादीनां च। एषा अवन्तिका, विशाला नाम्नापि शास्त्रेषु वर्णिता अस्ति। अत्र सर्वत्र पुरातात्विकं वैभवं दृष्ट्वा मनसि आनन्दो जायते। भगवतः महाकालस्य पुरीयं देशे श्रद्धायाः केन्द्रमस्ति।

(क) उज्जयिनी भारतस्य कीदृशं केन्द्रमासीत्?

(ख) उज्जयिन्याः अपरं नाम किम्?

(ग) किं दृष्ट्वा मनसि आनन्दो जायते?

(घ) महाकाल मन्दिरं कुत्र वर्तते?

(ङ) 'दृष्ट्वा' इत्यत्र कः प्रत्ययः?

(स) शैवदर्शनदृष्ट्या शैवकलादृष्ट्या च दशपुरीया अष्टमूर्तिः शैवमूर्तिषु अद्वितीया अस्ति। अद्यावधि शैवप्रतिमाः केवलं तिस्रः प्रसिद्धाः सन्ति। प्रथमा–प्रथमशताब्द्याः मथुरायाः अर्धनारीश्वरः। द्वितीया अष्टमशताब्द्याः एलीफैण्टायाः त्रिमूर्तिः। तृतीया दशमशताब्द्या चिदम्बरस्य नटराजः। शेषाणि लिङ्गानि।

(क) शैवदर्शनदृष्ट्या का अद्वितीया अस्ति?

(ख) कति शैवप्रतिमाः प्रसिद्धाः सन्ति?

(ग) अर्धनारीश्वरस्य मूर्तिः कुत्र अस्ति?

(घ) नटराजस्य मूर्तिः कस्यां शताब्द्यां निर्मिता?

(ङ) 'मूर्तिः' इत्यस्मिन् पदे विभक्ति–वचनञ्च लिखत।

प्र.9 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि – (5×2=10)

(अ) प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम्।
तृतीये नार्जितं पुण्यं, चतुर्थे किं करिष्यति।।

(क) प्रथमे का अर्जनीया?

(ख) द्वितीये किं अर्जनीयम्?

(ग) पुण्यं कस्मिन् वयसि अर्जनीयम्?

(घ) 'पुण्यम्' इति पदे का विभक्तिः?

(ङ) 'नार्जिता' इत्यस्मिन् पदे कः सन्धिः?



https://www.evidyarthi.in/

(ब) शुकवद् भाषणं कुर्याद्, बकवद् ध्यानमाचरेत्।
अजवच्चर्वणं कुर्याद्, गजवत्स्नानमाचरेत्।।

(क) बकवद् किम् आचरेत्?

(ख) भाषणं कथं कुर्याद्?

(ग) चर्वणं कथं कुर्याद्?

(घ) गजवत् किम् आचरेत्?

(ङ) 'कुर्यात्' इति पदस्य धातुः लकारञ्च लिखत।

(स) क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

(क) संमोहः कस्मात् भवति?

(ख) संमोहात् कः भवति?

(ग) बुद्धिनाशो कस्मात् भवति?

(घ) बुद्धिनाशात् किं भवति?

(ङ) 'क्रोधात्' इत्यस्मिन् पदे का विभक्तिः?

प्र.10 उचित युग्म–मेलनं कुरुत – (4)

| (अ) | (ब) |
|---|---|
| (i) मुनिशुकः | (i) पञ्चतन्त्रम् |
| (ii) 1940 ईशवीये | (ii) रामायणम् |
| (iii) विष्णु शर्मा | (iii) सीतारामः |
| (iv) वाल्मीकिः | (iv) भक्तैः दृष्टा |



https://www.evidyarthi.in/

प्र.11 शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (4)

(क) उज्जयिनीतः कर्करेखा निर्गता।

(ख) कुम्भकारस्त्राणि जन्मसिद्धानि आसन्।

(ग) अतिथिः महाराणागृहात् अनश्नन् गतवान्।

(घ) श्रवणकुमारः पित्रोः भक्तः आसीत्।

प्र.12 निम्नलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि – (4×1=4)

(क) जरद्गवनामा गृध्रः कुत्र वसति?

(ख) विप्रः कं सततम् अवलोकयति?

(ग) गीतायाः माता का?

(घ) हरिदत्तस्य पुत्रः कः?

(ङ) दीपः किं प्रसूयते?

(च) ऋषिः किमर्थं भ्रमति स्म?

प्र.13 प्रश्न पत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितद्वयं लिखत। (4)

प्र.14 स्वप्राचार्यस्य कृते अवकाशार्थं प्रार्थनापत्रं लिखत। (4)

अथवा

स्वमित्रस्य कृते एकं निमन्त्रणपत्रम् संस्कृते लिखत।

प्र.15 अधोलिखितेषु पञ्च अशुद्धकारक वाक्यानां शुद्धिः करणीया – (5×1=5)

(क) ध्रुवनारायणः विद्यालयं गच्छामि।
(ख) श्रीराम नमः।
(ग) अश्वात् सैनिकः पतामि।
(घ) हरे भक्तिं रोचते।
(ङ) बालकः सर्पं बिभेति।
(च) सः गच्छसि।
(छ) त्वं पठति।



https://www.evidyarthi.in/

प्र.16 अधोलिखित वाक्यानां कथाक्रमसंयोजनं कुरुत – (5)

(क) शयाने तस्मिन् प्रवाहः विरराम।

(ख) स तत्र संविवेश केदारखण्डे।

(ग) तदभिवादये भवन्तम्।

(घ) गुरुजनानामाज्ञा पालनीया।

(ङ) तस्य शिष्यः आसीत् आरुणिरिति।

प्र.17 अधोलिखितं अपठित–गद्यांशं पठित्वा संस्कृतभाषायाम् उत्तराणि लिखत – (5×1=5)

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एव। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीड्यन्ति, तेषां मूलम् अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

(क) अस्य गद्यांशस्य शीर्षकं लिखत।

(ख) दुःखानां मूलकारणं किम्?

(ग) समाजे अनेके विकाराः कथं जायन्ते?

(घ) के उपद्रवाः अस्मान् पीड्यन्ति?

(ङ) अज्ञानस्य अन्धकारं हर्तुं वयं किं कुर्याम?

प्र.18 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – (10)

(क) उद्यानम्।

(ख) मम पाठशाला।

(ग) पुस्तकम्।

(घ) शिक्षकः।



https://www.evidyarthi.in/